डॉ. इतिश्री महापात्र
केन्द्रीयसंस्कृतविश्वविद्यालयः
धर्मशास्त्रविभागः
एकलव्य-परिसरः, अगरतला,त्रिपुरा

# विवाहसंस्कारस्य महत्त्वम्

## ❖ विवाहस्य व्युत्पत्तिः तथा उद्देश्यम् -

वि उपसर्गात् ‘वह’ प्रापणे धातोः ‘घञ्’ प्रत्यय कृते विवाहशब्दः निष्पद्यते। सामान्यतः स्त्रीपुरुषोर्मिलनमेव विवाहशब्देन बोध्यते। अपत्नीकः पुरुषः यज्ञादिकर्मानुष्ठातुं नार्हति। तस्मात्सोऽयज्य इत्युच्यते। मुख्यतो विवाहस्योद्देश्यत्रयं विद्यते। पुत्रार्थं यज्ञार्थं रत्यर्थं श्च। वंशवृद्ध्यर्थं पित्रुद्देश्येन पिण्डोदकदानार्थं च पुत्रस्यावश्यकता सुतरां विद्यते। पत्नी विना पुरुषोऽपूर्णो भवति। यज्ञाद्यनुष्ठानार्थं पत्नी ग्रहणमप्यनिवार्यम्। हिन्दूनां कृते विवाहः एकः संस्कार विशेषः येन पुरुषः समाजे एकः पूर्णसामाजिकमानवरुपेण परिचियते।

## ❖ विवाहस्य भेदाः -

चतुर्णामपि वर्णानां ब्राह्मण-क्षत्रिय-वैश्य-शूद्राणाम् अस्मिन् एव संस्कारे अधिकारोऽस्ति । अयं च विवाह द्विविधः अनुलोमः प्रतिलोमश्चेति । प्रतिलोम विवाहः सर्वदा निन्दीतो भवति । प्रतिलोमजाः धर्महीनाः भवन्ती इति मनुना उक्तम् । अत एव धर्मशास्त्रेषु अनुलोमविवाहस्य विचारः दृश्यते ।

ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथासुरः ।
गार्धर्व राक्षसश्चैव पैशाचश्चाष्टमोऽधमः ।।

अर्थात् ब्राह्म- दैव-आर्ष-प्राजापत्य-आसुर-गान्धर्व-पैशाच-राक्षसश्चेति ।

❖ **ब्राह्मविवाहः -**

आच्छाद्य चाऽर्चयित्वा च श्रुतिशीलवते स्वयम् ।
आहूय दानं कन्याया ब्राह्मो धर्मः प्रकीर्तितः ।।

अर्थात् उपर्युक्तलक्षणयुक्तं वरं आहूय यथाशक्ति अलंकृत्य उदक-दान-पूर्वकं कन्यादानं ब्राह्मविवाहः इति कथ्यते । ब्राह्माविवाहेन यः पुत्रः उत्पन्न भवति सः पूर्वदश पुरुषान् परदश पुरुषान् आत्मानं च मलित्वा एकविंशति पुरुषान् पापन्मुक्तो करोति ।

❖ **दैवविवाहः -**

यज्ञे तु वितते सम्यगृत्विजे कर्म कुर्वते ।
अलङ्कृत्य सुतादानं दैवं धर्मं प्रचक्षते ।।

अर्थात् ज्यातिष्टोमादियज्ञानुष्ठाने यथाविधि ऋत्विजे कर्मकर्त्रे यथाशक्त्यलंकृत्य कन्यादानं दैवविवाहः इति उच्यते । दैवविवाहेन यः पुत्रोत्पन्नो भवति सः पूर्वसप्तपुरुषान् च परसप्तपुरुषान् पापन्मोचयति ।

❖ आर्षविवाहः-

एकं गोमिथुनं द्वे वा वरादादाय धर्मतः ।
कन्याप्रदानं विधिवदार्षो धर्मः स उच्यते ।।

अर्थात् यत्र गोमिथुनं द्वे मादाय कन्यां दीयते स च विवाहः आर्षविवाहः । आर्षविवाहेन यः पुत्रोत्पन्नः भवति तद्द्वारा पूर्वत्रिपुरुषाः परत्रिपुरूषाः पापान्मुक्ता भवन्ति।

❖ प्राजापत्यविवाहः –

सहोभौ चरतां धर्ममिति वाचाऽनुभास्य च ।
कन्याप्रदानमभ्यर्च्य प्राजापत्यो विधिः स्मृतः ।।

अर्थात् सह युवां धर्मं चरतामिति परिभाष्य यत् कन्यादानं स प्राजापत्यविवाहः इति उच्यते । अस्मिन् विवाहे उत्पन्नः षट्पूर्वान् षट्परान् च पापान्मोचयति ।

## ❖ आसुरविवाहः –

ज्ञातिभ्यो द्रविणं दत्त्वा कन्यायै चैव शक्तितः ।
कन्याऽऽप्रदानं स्वाच्छन्द्यासुरो धर्म उच्यते ।।

अर्थात् कन्यायाः ज्ञातिभ्यः पित्रादिभ्यः यथाशक्तिं धनं दत्वा यः विवाहः स च विवाहः आसुरविवाहः इति उच्यते ।

## ❖ गान्धर्वविवाहः –

इच्छयाऽन्योन्यसंयोगः कन्यायाश्च वरस्य च ।
गान्धर्वः स तु विज्ञेयो मैथुन्यः कामसम्भवः ।।

अर्थात् परस्परप्रेमसम्बन्धेन यः विवाहः गान्धर्वविवाह इति उच्यते । पुनः मैथुननिमित्तं वरकन्याभ्यां स्वेच्छया यः विवाहः क्रियते स च विवाहः गान्धर्वविवाहः इति उच्यते ।

❖ **राक्षसोविवाहः –**

हत्वा छित्वा च भित्वा च क्रोशन्तीं रुदन्तीं गृहात् ।
प्रसह्य कन्याहरणं राक्षसो विधिरुच्यते ।।

अर्थात् बलात्कारेण कन्याया हरणं राक्षसो विवाहः इति उच्यते । पुनः हत्वा,छित्वा,भित्वा वा बलपूर्वको विवाहः राक्षसोविवाहः इति उच्यते ।

❖ **पैशाचविवाहः –**

सुप्तां मत्तां प्रमत्तां वा रहो यत्रोपगच्छति ।
स पापिष्ठो विवाहानां पैशाचः प्रथितोऽधमः ।।

अर्थात् मैथुननिमित्तं यो विवाहः स च विवाहः पैशाचविवाहः इति उच्यते । अयं निन्दितो विवाहः ।

➢ **।। एतेषु अष्टसु विवाहेषु आद्याः चत्वारः विवाहाः धर्म्याः । गान्धर्व विवाहोऽपि क्षत्रियाणां कृते धर्म्यविवाहः । एतेषु धर्म्येषु विवाहेषु उत्पन्नः पुत्रः पितृन् सन्तापयति ।।**